# Sardar Patel Statue Establishment Program (21-12-2018)

According to the instruction of the Education Department of Gujarat State, the statue of Iron Man, Sardar Vallabhbhai Patel was established in Shri Somnath Sanskrit University on 21 December 2018, in the auditorium of the University's educational building. The Chief Guest of this program was Mr. Rajshi Bhai Jotava head of Seed.

## श्रीसोमनाथसंस्कृतविश्वविद्यालये सरदार-वल्लभभाई-पटेलस्य प्रतिमायाः प्रतिष्ठापनकार्यक्रमः



प्रतिमाप्रतिष्ठापनकार्यक्रमे मञ्चासीनाः कुलपतयः अन्ये च महानुभावाः

गुजरातराज्यस्य शिक्षणविभागस्य निर्देशानुसारं गुजरातस्य प्रायः स विश्वविद्यालयेषु लोहपुरुषस्य सरदारवल्लभभाई-पटेलस्य प्रतिमाः प्रतिष्ठापिताः। तस्मिन्नेव उपक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयेऽपि सरदारपटेलस्य प्रतिमा आनीता। तस्याः स्थापनाय सुन्दरः मञ्चोऽपि विश्वविद्यालयस्य शैक्षणिकभवनस्य सभागृहे निर्मितः। अस्याः प्रतिमायाः प्रतिष्ठापनं २१.१२.२०१८ दिनाङ्के जातम्।

बीजनिगमस्य प्रमुखः श्रीराजशीभाई जोटवाणी, विश्वविद्यालयस्य कुलपतिः आचार्यः गोपबन्धुमिश्रः, भारतीयजनतादलस्य नगरप्रमुखः श्रीप्रवीणभाई रूपारेलिया, मामलतदारः श्री डी.बी. आम्बलियामहोदयश्च उपस्थाय कार्यक्रमस्यास्य शोभां वर्धितवन्तः। अन्येऽपि नैके नगरश्रेष्ठिनः ऐतिहासिकेऽस्मिन् कार्यक्रमे समुपातिष्ठन्।

मुख्यातिथिना श्रीमता जोटवामहोदयेन स्वीये भाषणे उक्तं यत् श्रीमता सरदारपटेलेन स्वतन्त्रभारतस्य प्रायः ५६२ खण्डान् संयोज्य सम्प्रतिविद्यमानं स्वरूपं साधितम्। स्वीये आध्यक्षीयभाषणे कुलपतिचरणैः ''सरदारपटेलः पश्चिमात् समुदितः सूर्यः एव अस्ति'' इति सगौरवं प्रतिपादितम्। भाषणान्ते समुपस्थिताः सर्वेऽपि जनाः सरदारपटेलस्य चरणयोः पुष्पाञ्जलिं समार्पयन्। कार्यक्रमेऽस्मिन् सभासञ्चालनं डॉ. दीपेशकतिरा अकरोत्।

Report Source: **SOMJYOTI**- University Newsletter (Issue: 17-18, page no. 06)




લોહપુરૂષ સરદાર પટેલની
પ્રતિમા પ્રસ્થાપિત
કરવાનો કાર્યક્રમ
તા. ૨૧-૧૨-૨૦૧૮
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्

